सद्यारो भेदन: क्काथ: पेय: सर्व्वज्वरापह: ॥"

इति त्रिवृतादि ॥ ७६ ॥

अथ जीर्णज्वरे ।

"निदिग्धिकानागरकामृतानां
क्काथं पिबेन्मिश्रितपिप्पलीकम् ।
जीर्णज्वरारोचककासशूल-
श्वासाग्निमान्द्यार्दितपीनसेषु ॥
हन्त्याईगामयं प्राय: सायं तेनायमिष्यते ॥"

इति निदिग्धादि ॥ ७७ ॥

"पिप्पलीचूर्णसंयुक्त: क्काथश्छिन्नरुहोद्भव: ।
जीर्णज्वरकफध्वंसी पञ्चमूलीकृतोऽथवा ॥
कासाजीर्णारुचिश्वासहृत् पाण्डुक्रिमिरोगनुत्
॥ ७८ ॥

इति जीर्णज्वराधिकार: ॥ * ॥

अथ सन्ततादिज्वरे ।

"मधुकं चन्दनं मुस्तं धात्री धान्यमुशीरकम् ।
छिन्नोद्भवा पटोलञ्च क्काथं समधुशर्करम् ॥
ज्वरं पञ्चविधं हन्यात् सन्ततादं सुदारुणम् ।
वातिकं पैत्तिकञ्चैव श्लैष्मिकं सान्निपातिकम् ॥
आमं विपाचयत्याशु निरामं शमयत्यपि ॥"

इति मधुकाद्यम् ॥७९॥

"कलिङ्गका: पटोलस्य पत्रं कटुकरोहिणी ॥८०॥
पटोलं शारिवामुस्तं पाठा कटुकरोहिणी ॥८१॥
निम्बं पटोलं त्रिफला म्द्वीका मुस्तवत्सकौ ॥
॥ ८२ ॥
किराततिक्तममृता चन्दनं विश्वभेषजम् ॥८३॥
गुडूच्यामलकं मुस्तम् ८४ अर्द्धश्लोकसमापना: ।
कषाया: शमयन्त्याशु पञ्च पञ्चविधान् ज्वरान् ॥
सन्ततं सततान्येद्युस्तृतीयकचतुर्थकान् ।
गुडूचीमुस्तधात्रीणां कषायंवा समाक्षिकम् ॥
मुस्तामलकगुडूचीविश्वौषधकण्टकारिकाक्काथ:।
पीत: सकणाचूर्ण: समधुर्व्विषमज्वरं हन्ति ॥"

इति मुस्तादि ॥ ८५ ॥ * ॥

अथ तृतीयकज्वरे ।

"महौषधामृतामुस्तचन्दनोशीरधान्यकै: ।
क्काथस्तृतीयकं हन्ति शर्करामधुयोजित: ॥"

इति महौषधादि ॥ ८६ ॥

अथ चातुर्थकज्वरे ।

"वासाधात्रीस्थिरादारुपथ्यानागरसाधित: ।
सितामधुयुत: क्काथश्चातुर्थकनिवारण: ॥"८७ ॥

इति ज्वराधिकार: ॥ * ॥

अथ ज्वरातीसारे ।

"पाठेन्द्रयवभूनिम्बमुस्तपर्पटकामृता: ।
जयन्त्याममतीसारं सज्वरं समहौषधा: ॥"

इति पाठादि ॥ ८८ ॥

"नागरातिविषामुस्तभूनिम्बामृतवत्सकै: ।
सर्व्वज्वरहर: क्काथ: सर्व्वातीसारनाशन: ॥"

इति नागरादि ॥ ८९ ॥

"ह्रीवेरातिविषामुस्तविल्वधान्यकनागरै: ।
पिबेत् पिच्छाविबन्धघ्नं शूलदोषामपाचनम् ॥
सरक्तं हन्त्यतीसारं सज्वरं वाथ विज्वरम् ॥"

इति ह्रीवेरादि ॥ ९० ॥

"गुडूच्यतिविषाधान्यशुण्ठीविल्वाब्दवालकै: ।
पाठाभूनिम्बकुटजचन्दनोशीरपद्मकै: ॥
कषाय: शीतल: पेयो ज्वरातीसारशान्तये ।
हृल्लासारोचकच्छर्द्दिपिपासादाहनाशन: ॥"

इति ह्रद्गुडूच्यादि ॥ ९१ ॥

"उशीरं वालकं मुस्तं धन्याकं विश्वभेषजम् ।
समङ्गा धातकी लोध्रं विल्वं दीपनपाचनम् ॥
हन्त्यरोचकपिच्छामं विबन्धं सातिवेदनम् ।
सशोणितमतीसारं सज्वरं वाथ विज्वरम् ॥"

इति उशीरादि ॥ ९२ ॥

"पञ्चमूलीबलाविल्वगुडूचीमुस्तनागरै: ।
पाठाभूनिम्बह्रीवेरकुटजत्वक्फलै: शृतम् ॥
हन्ति सर्व्वानतीसारान् ज्वरदोषं वमिं तथा ।
सशूलोपद्रवं श्वासं कासं हन्यात् सुदारुणम् ॥"

इति पञ्चमूल्यादि ॥ ९३ ॥

"कलिङ्गातिविषाशुण्ठीकिराताम्बुयवासकम् ।
ज्वरातिसारसन्तापं नाशयेदविकल्पत: ॥"

इति कलिङ्गादि ॥ ९४ ॥

"वत्सकस्य फलं दारु रोहिणी गजपिप्पली ॥"

इति वत्सकादि ॥ ९५ ॥

"श्वदंष्ट्रा पिप्पलीधान्यं विल्वं पाठायमानिका॥"

इति श्वदंष्ट्रादि ॥ ९६ ॥

"द्वावपेतौ सिद्धियोगौ श्लोकार्द्धेनाभिभाषितौ ।
ज्वरातीसारशमनौ विशेषाद्दाहनाशनौ ॥
नागरामृतभूनिम्बविल्वबालकवत्सकै: ।
समुस्तातिविषोशीरैर्ज्वरातीसारनुज्जलम् ॥"

इति नागरादि ॥ ९७ ॥

"मुस्तकविल्वातिविषापाठाभूनिम्ब-
वत्सकै: क्काथ: ।
मकरन्दगर्भयुतो ज्वरातिसारौ जयेद्घोरौ ॥"

इति मुस्तकादि ॥ ९८ ॥

"घनजलपाठातिविषापथ्योत्पलधान्य-
रोहिणीविश्वै: ।
सेन्द्रयवै: शृतमम्भ: सातीसारं ज्वरं जयति ॥"

इति घनादि ॥ ९९ ॥

"दशमूलीकषायेण विश्वमल्पसमं पिबेत् ।
ज्वरे चैवातिसारे च सशोथे ग्रहणीगदे ॥"

इति दशमूलशुण्ठी ॥ १०० ॥

"किराताब्दामृताविश्वचन्दनोदीच्यवत्सकै: ।
शोथातीसारशमनं विशेषात् ज्वरनाशनम् ॥"

इति किरातादि ॥ १०१ ॥

इति ज्वरातीसाराधिकार: ॥ * ॥

अथातीसारे ।

"धान्यकं नागरं मुस्तं वालकं विल्वमेव च ।
आमशूलविबन्धघ्नं पाचनं वह्निदीपनम् ॥"

इति धान्यपञ्चकम् ॥ १०२ ॥

"इदं धान्यचतुष्कं स्यात् पैत्ते शुण्ठीं विना पुन: ॥"

इति धान्यचतुष्कम् ॥ १०३ ॥

"कञ्चटदाड़िमजम्बुशृङ्गाटकपत्रविल्वह्रीवेरम् ।
जलधरनागरसहितं गङ्गामपि वेगिनीं रुन्ध्यात्॥

इति कञ्चटादि ॥ १०४ ॥

"किराततिक्तकं मुस्तं वत्सकं सरसाञ्जनम् ।
पिबेत् पित्तातिसारघ्नं सक्षौद्रं वेदनापहम् ॥"

इति किराततिक्तकादि ॥ १०५ ॥

"कुटजत्वक्फलं मुस्तं क्काथयित्वा जलं पिबेत् ।
अतीसारं जयेदाशु शर्करामधुयोजितम् ॥"

इति कुटजादि ॥ १०६ ॥

"विल्वचूतास्थिनिर्यूह: पीत: सक्षौद्रशर्कर: ।
निहन्याच्छर्द्द्यतीसारं वैश्वानर इवाहुतिम् ॥"

इति विल्वादिक्काथ: ॥ १०७ ॥

"पटोलयवधन्याकक्काथ: पेय: सुशीतल: ।
शर्करामधुसंमिश्रश्छर्द्द्यतीसारनाशन: ॥"

इति पटोलादिक्काथ: ॥ १०८ ॥

"कुटजं दाड़िमं मुस्तं धातकी विल्वबालकम् ।
लोध्रचन्दनपाठाश्च कषायं मधुना पिबेत् ॥
सामे सशूले रक्ते च पिच्छास्रावे च शस्यते ।
कुटजादिरिति ख्यात: सर्व्वातीसारनाशन: ॥"

इति कुटजादि ॥ १०९ ॥

"समङ्गातिविषा मुस्तं विल्वं ह्रीवेरधातकी ।
कुटजत्वक् फलं विश्वं क्काथ: सर्व्वातिसारनुत्॥"

इति समङ्गादि ॥ ११० ॥

"कुटजत्वक्कृतक्काथो घनीभूत: सुशोभन: ।
लोहितोऽतिविषायुक्त: सर्व्वातीसारनाशन: ॥"

इति कुटजक्काथ: ॥ १११ ॥

"सवत्सक: सातिविष: सविल्व:
सोदीच्यमुस्तश्च कृत: कषाय: ।
सामे सशूले सह शोणिते च
चिरप्रवृत्तेऽपि हितोऽतिसारे ॥"

इति वत्सकादि ॥ ११२ ॥

"कषायो मधुना पीतस्त्वचो दाड़िमवत्सकात् ।
सद्यो जयेदतीसारं सरक्तं दुर्निवारणम् ॥"

इति कुटजदाड़िमम् ॥ ११३ ॥ * ॥

अथ ग्रहण्याम् ।

"ग्रहणीमाश्रितं दोषमतीसारवदाचरेत् ।
अतीसारोक्तविधिना तस्यामञ्च विपाचयेत् ॥
नागरातिविषामुस्तक्काथ: स्यादामपाचन: ॥"

इति नागरादि ॥ ११४ ॥ * ॥

अथाग्निमान्द्ये ।

"विश्वाभयागुडूचीनां कषायेण षड़ूषणम् ।
पिबेत् श्लेष्माणि मन्देऽग्नौ त्वक्पत्रसुरभीकृतम् ॥
पञ्चकोलं समरिचं षड़ूषणमुदाहृतम् ॥"

इति षड़ूषणविश्वादि ॥ ११५ ॥ * ॥

अथामाजीर्णे ।

"धान्यनागरसंसिद्धं तोयं दद्याद्विचक्षण: ।
आमाजीर्णप्रशमनं दीपनं वस्तिशोधनम् ॥"

इति धान्यशुण्ठी ॥ ११६ ॥ * ॥

अथ पाण्डुरोगे ।

"फलत्रिकामृतावासातिक्ताभूनिम्बनिम्बज: ।
क्काथ: क्षौद्रयुतो हन्यात् पाण्डुरोगं सकामलम्॥"

इति फलत्रिकादि ॥ ११७ ॥ * ॥

अथ रक्तपित्ते ।

"जलं खर्ज्जूरमृद्वीकामधुकै: सपरूषकै: ।
शृतशीतं प्रयोक्तव्यं तर्पणार्थं सशर्करम् ॥"

इति खर्ज्जूरादिजलम् ॥ ११८ ॥ * ॥